National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(58): 274-275
© 2025 NJHSR
www.sanskritarticle.com

**वि.वि.के.एस्.कृष्णतेज**
शोधच्छात्र; अथर्ववेद भाष्यविभागः,
श्रीवेंङ्कटेश्वर वेद विश्वविद्यालय,
तिरुपति

**Correspondence:**
**वि.वि.के.एस्.कृष्णतेज**
शोधच्छात्र; अथर्ववेद भाष्यविभागः,
श्रीवेंङ्कटेश्वर वेद विश्वविद्यालय,
तिरुपति

# गोपथब्राह्मणे यज्ञपुरुषस्वरूपवर्णनम्

**वि.वि.के.एस्.कृष्णतेज**

मङ्गलाचरणम् - **विश्ववन्द्यपदो वन्दे विबुधान् वेदविश्रुतान्।**
**पञ्च हेरम्ब-वैकुण्ठ-शक्ति-शङ्कर-भास्करान्।।**

तत्र श्रीमदथर्ववेदीय गोपथब्राह्मणे उत्तरभागे पञ्चमप्रपाठके चतुर्थकण्डिकायां यज्ञपुरुषस्य स्वरूपविचारः कृतः । सा च कण्डिका -

**"पुरुषो वै यज्ञः, तस्य शिर एव हविर्धानम्, मुखमाहवनीयः, उदरं सदः, अन्तरुक्थानि बाहू मार्जालीयश्चाग्नीध्रीयश्च, या इमा देवतास्ते अन्तः सदः, सन्धिष्ठ्याप्रतिष्ठे गार्हपत्यव्रतश्रवणौ इति। अथापरन्तस्य, मन एव ब्रह्मा, प्राण उद्गाता, अपानः प्रस्तोता, व्यानः प्रतिहर्ता, वाग्घोता, चक्षुरध्वर्युः, प्रजापतिः सदस्यः, अङ्गानि होत्राशंसिनः, आत्मा यजमानः"**[1] इति।

अथ अत्रोपवर्णित यज्ञपुरुषस्वरूपं विव्रियते।

अत्र "पुरुषो वै यज्ञः" इत्यादिवचनात् पुरुषस्य यज्ञसाम्यत्वं ज्ञायते।

तत्र सोमयज्ञशाला मध्ये हविर्धानादिमण्डपाः भवन्ति। तेषां मण्डपानां यज्ञपुरुषस्य विभिन्न अङ्गरूपसादृश्यम् अत्र गोपथश्रुतौ उपलभ्यते। अस्याः कण्डिकायाः अयमर्थः -

यज्ञपुरुषस्य शिरः एव हविर्धानम्। तस्य यज्ञपुरुषस्य मुखरूपेण आहवनीयः, उदररूपेण सदो मण्डपम्, मार्जालीय आग्नीध्रीयश्च शाले, यज्ञपुरुषस्य बाहूरूपेण भवतः। यज्ञपुरुषस्य सन्धिष्ठ्या प्रतिष्ठा च अर्थात् पादग्रन्थिश्च पादतलं च, गार्हपत्य दक्षिणाग्नी वर्तेते।

अनन्तरं तत्र यज्ञपुरुषस्य मनःप्राणादीनां वर्णनं कृतमस्ति।

इह ब्रह्मानाम ऋत्विक् यज्ञपुरुषस्य मनोरूपेण विद्यते। प्राण एव उद्गाता, अपानः प्रस्तोता, व्यानः प्रतिहर्ता, वाक् होता, चक्षुः अध्वर्युः, होत्राशंसिनः यज्ञपुरुषस्य अङ्गानि इति विभागः। तत्र यजमानः साक्षात् यज्ञपुरुषस्य आत्मारूपेण विद्यते। एवं प्रकारेण अत्र यज्ञपुरुषस्वरूपः प्रतिपादितः।किमर्थं यज्ञपुरुषस्य शिरोरूपेण हविर्धानस्य उपचारः? मुखरूपेण आहवनीयः, उदररूपेण सदोमण्डपम्, बाहूरूपेण मार्जालीयाग्नीध्रीयौ एवम् अन्येषां च उदीरितानां तेषां सम्बन्धः कथं सिद्ध्यति? इत्युक्ते उच्यते श्रुत्यन्तरे च -

आम्नायते यथा वाजश्रुतौ शतपथे -

**"पुरुषो वै यज्ञः। पुरुषस्तेन यज्ञो यदेनं**
**पुरुषस्तनुत एव वै तायमानो यावानेव**
**पुरुस्तावान्विधीयते तस्मात् पुरुषो यज्ञः"**[2] इति।।

अत्र पुरुष एव यज्ञः इति श्रूयते। इह यज्ञशब्देन तदाधारभूतः सदो हविर्धानादिकः उच्यते। तदेव विवृणोति -

"शिर एवाऽस्य हविर्धानम्। वैष्णवं देवताया....."इति अनेन हविर्धानस्य यज्ञशिरस्त्वे कारणमाह "वैष्णवं देवतया" इत्यादिना। अर्थात् विष्णुदेवताकैर्मन्त्रैः निर्मातिव्यत्वात् वैष्णवत्वम्। सः विष्णुः द्युस्थानीयो देवता। द्युलोकश्च यज्ञपुरुषस्य शिरस्थानीयः।

यतो हि उक्तं तैत्तिरीयकेऽपि - **"शीर्ष्णो द्यौः समवर्तत"**[3] इति। विष्णोः सर्वदेवतानामुत्तमत्वात् शिरसोऽपि अङ्गानामुत्तमत्वात् युक्तं हविर्धानस्य शिरस्त्वम्। अतः "शिर एव हविर्धानम्" इति गोपथे उक्तम्।

**अथ मुखसाम्यं दर्शयति –**

"मुखमेवास्याहवनीयः। स यदाहवनीये जुहोति यथा मुख आसिञ्चेदेव तत्" इत्यादिना। यथा अध्यात्मपक्षे पुरुषेण मुखादेव आहारः स्वीक्रियते तथैव अत्रापि हवीरूपः सोमादिः आहवनीये एव प्रक्षिप्यते। अतः प्रक्षेपसाम्यात् "मुखमाहवनीयः" इति गोपथे उक्तम्।

**बाह्वोः साम्यं दर्शयति -**

"बाहू एवास्याऽग्नीध्रीयश्च मार्जालीयश्च" इति। हविर्धानस्य उत्तरस्याम् "आग्नीध्रीयः" दक्षिणस्यां "मार्जालीयः" अत एव "बाहू" इति। उभयतः समानत्वात् तौ बाहुस्थानीयौ इत्यर्थः।

**अथ सदसः उदरसाम्यं दर्शयति -**

**"उदरमेवास्य सदः। तस्मात्सदसि भक्षयन्ति**
**यद्धीदं किञ्चाश्नन्त्युदर एवेदं सर्वं प्रतितिष्ठति"** इति।।

तत्र अध्यात्मपक्षेऽपि पुरुषेण यत्किमपि भुङ्क्ते तत् सर्वम् उदरे एवं प्रतितिष्ठति। पुरुषेण भुक्तमन्नम् उदरे जाठराग्नौ प्रक्षिप्यते। भगवताप्युक्तम् -

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।**
**प्राणापानसमायुक्तं पचाम्यन्नं चतुर्विदम्।।**[4] इति।

तद्वत् अत्रापि व्यपदिश्यते। आहवनीये हविस्समर्पणानन्तरं सदसि एव ऋत्विग्यजमानाः शेषभक्षणं कुर्वन्ति। अतः सदसि भक्षसम्भवात् भक्षणसाम्यात् "उदरं सदः" इति गोपथे उक्तम्।

**अथ चक्षुस्साम्यमुच्यते -**

तत्र सोमयागे "शुक्रामन्थी" इति ग्रहपात्रे स्तः। तयोः ग्रहयोः यज्ञपुरुषस्य चाक्षुषेण सह सम्बन्धः श्रुत्या विहितः। तथाहि श्रूयते शतपथे -

**"चक्षुषी हवाऽस्य शुक्रामन्थिनौ"** इति।

अनयोः ग्रहयोः अनुष्ठानकर्तारौ अध्वर्युः प्रतिप्रस्याता च स्तः। अत एव गोपतश्रुतावपि "चक्षुरध्वर्युः" इति।सः अध्वर्युः यदा स्तोत्रमुपाकरोति "सोमः पवते" इत्यादि मन्त्रेण तदा सः यज्ञपुरुषस्य चक्षुरेव प्राणैः सह सन्दधाति।

पूर्वं तत्र कण्डिकायां यज्ञपुरुषस्य मनःप्राणादीनां ऋत्विग्रूपेण वर्णनं कृतमस्ति। तत्प्रकारः अपि अर्थात् एतेषां ऋत्विजां सर्वेषां, प्राणानाम् अवयवानां वा परस्परव्यवहारः कीदृशो भवति इति अस्मिन् गोपथब्राह्मणे सम्यक्तया विवृतमस्ति। यथाहि -

**"अथ यत् प्रस्तोता ब्रह्माणमामन्त्रयते, ब्रह्मन् स्तोष्यामः प्रशास्तरिति। मनोग्रनीर्भवति एतेषां प्राणानां, मनसा हि प्रसूताः स्तोमेन स्तूयामेति, प्राणानेव तन्मनसा सन्दधाति। अथ यद्ब्रह्मा स्तुतेत्युच्चैरनुजानाति, मनो वै ब्रह्मा, मन एव तत्प्राणैः सन्दधाति। अथ यत् प्रस्तोता प्रस्तौति, अपानमेव तत् प्राणैः सन्दधाति। अथ यत् प्रतिहर्ता प्रतिहरति, व्यानमेव तदपानैः सन्दधाति। अथ यदुद्गातोद्गायति, समानमेव तत् प्राणैः सन्दधाति। अथ यत् होता साम्ना शस्त्रमुपसन्तनोति, वाग्वै होता, वाचमेव तत् प्राणैः सन्दधाति।अथ यत् सदस्यो ब्रह्माणमुपासीदति, प्रजापतिर्वै सदस्यः प्रजापतिमेवाप्नोति। अथ यत् होत्राशंसिनः सामसन्ततिं कुर्वन्ति, अङ्गानि वै होत्राशंसिनः। अङ्गान्येवास्य तत् प्राणैः सन्दधाति। अथ यत् यजमानः स्तोत्रमुपासीदति, आत्मा वै यजमानः, आत्मानमेवास्य तत् कल्पयति"**[5] इति।

यथा अध्यात्मे पुरुषे चक्षुः वाक् प्राणः इत्यादीनां इन्द्रियाणां परस्परवैज्ञानिकः व्यवहारः दरीदृश्यते। तस्यैव विज्ञानस्य प्रतिपादनम् उपरि यज्ञपुरुषवर्णः समये ऋषिणा कृतम्। किं बहुना। उदाहरणार्थम् अध्यात्मे वागुच्चारणसमये मनः प्राणः वाचः यादृश व्यवहारो भवति तथैव व्यवहारः यज्ञपुरुषे ब्रह्मोद्गातृहोता च मिलित्वा व्यवहरन्ति। एवमेव अन्ये ऋत्विजः यज्ञपुरुषस्य इन्द्रियसम्बन्धिव्यवहारान् कुर्वन्ति।

एवं प्रकारेण श्रीमथर्ववेदीय गोपथब्राह्मणे उत्तरभागे पञ्चमप्रपाठके चतुर्थकण्डिकायां यज्ञपुरुषस्य स्वरूपमुपवर्णितमस्ति।

**उपसंहारः -**

अनेन ज्ञायते यत् यज्ञात् सृष्टा इयं मनुष्यसृष्टिरपि तादृशैव व्यवहारं करोति यादृशः यज्ञस्य व्यवहारः दृश्यते कार्यकारणभावात्।

**सहायकग्रन्थसूची**

1. गोपथ- ब्राह्मण- भाष्यम् (आर्यभाषायामनुवादः – भाषानुवाद-सहितम्) सम्पादिके - आचार्या डा० प्रज्ञादेवी एवं व्याकरणाचार्या मेधादेवी। चौखम्बा-कृष्णदास-अकादमी, वाराणसी २२१००१.

2. शतपथब्राह्मणम् एक सांस्कृतिक अध्ययन। मेहरचन्द लछमनदास पब्लिकेशंस, नई दिल्ली - 110002

**पाद टिप्पणी:-**

[1] गो.ब्रा.उत्त.भा.कण्डिका-4

[2] श.ब्रा.14.1.4.2

[3] तै.ब्रा

[4] भ.गी.

[5] गो.ब्रा.उत्त.भा.कण्डिका-4